# Shri Hayagriva Upasanam Nirupanam

# श्रीहयग्रीवोपासनं निरूपणम्

## Document Information

Text title : Hayagriva Upasanam Nirupanam

File name : hayagrIvopAsanaMnirUpaNam.itx

Category : vishhnu

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : August 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2023

*sanskritdocuments.org*

# श्रीहयग्रीवोपासनं निरूपणम्

उद्गीथपदमारभ्य प्रणवोद्गथशब्दतः ।
सर्ववागीश्वरेत्यन्ते प्रवदेदीश्वरेत्यथ ॥ १॥

सर्ववेदमयाचिन्त्य पदान्ते सर्वमीरयेत् ।
बोधयद्वितयान्तोऽयं मन्त्रस्तारादिरीरितः ॥ २॥

ऋषिः ब्रह्मास्य निर्दिष्टः छन्दोऽनुष्टुप् उदाहृतम् ।
देवता स्यात् हयग्रीवो वागैश्वर्यप्रदो विभुः ॥ ३॥

तारेण पादैः मन्त्रस्य पञ्चाङ्गानि प्रकल्पयेत् ॥। ४॥

तुषाराद्रिसमच्छायं तुलसीदामभूषितम् ।
तुरङ्गवदनं वन्दे तुङ्गसारस्वत प्रदम् ॥ ५॥

ध्यात्वैवं प्रजसेन्मन्त्रमयुतं तद्दशांशतः ।
मध्वक्तैः पायसैर्हुत्वा विमलादिसमन्विते ॥ ६॥

पूजयेद्वैष्णवे पीठमूर्तिं सङ्कल्प्य मूलतः ॥। ७॥

कर्णिकायां चतुर्दिक्षु यजेत् पूर्वादितः क्रमात् ।
सनन्दनं च सनकं श्रियं च पृथिवीं तथा ॥ ८॥

तद्वहिर्दिक्षु वेदाश्च षट्कोणेषु ततोऽर्चयेत् ।
निरुक्तं ज्योतिषं पश्चाद्यजे द्याकरणं ततः ॥ ९॥

कल्पं शिक्षां च छन्दासि वेदाङ्गानि त्विमानि वै ॥। १०॥

ततोऽष्टदलमूले तु मातरोऽष्टौ समर्छयेत् ॥ ११॥

वक्रतुण्डादिकानष्टौ दलमध्ये प्रपूजयेत् ।
दलाग्रेष्वर्चयेत् पश्चात् साधकश्चाष्ट भैरवान् ॥ १२॥

असिताङ्गं रुरुं चैव भीषणं रक्तनेत्रकम् ।

बटुकं कालदमनं दन्तुरं विकटं तथा ॥ १३॥

तद्बहिः षोडशदलेष्ववतारान् हरेर्दश ।
शङ्खं चक्रं गदा पद्मं नन्दकं शार्ङ्गमेव च ॥ १४॥

तद्बहिः भूगृहे शक्रमुखान् दश दिगीश्वरान् ।
वज्राद्यान् तद्बहिश्चेष्ट्वा द्वारेषु च ततः क्रमात् ॥ १५॥

महागणपतिं दुर्गां क्षेत्रेशं बटुकं तथा ।
समस्तप्रकटाद्याश्च योगिन्यस्तद्बहिर्भवेत् ॥ १६॥

तद्बहिः सप्तनद्यश्च तद्बाह्येतु ग्रहान् नव ।
तद्बाह्ये पर्वतानष्टौ नक्षत्राणि च तद्बहिः ॥ १७॥

दीपं पञ्चदशावृत्त्या सम्पूज्य तुरगाननम् ।
वागीश्वर समोवाचि धनैर्थनपतिर्भवेत् ॥ १८॥

एवं सिद्धे मनौ मन्त्रप्रयोगान् कर्तुमर्हति ।
अष्टोत्तरसहस्रं तु शुद्धवार्यभिमन्त्रितम् ॥ १९॥

बीजेन मासमात्रं यः पिबेद्धीमान् जितेन्द्रियः ।
जन्ममूकोऽपि स नरो वाक्सिद्धिं लभते ध्रुवम् ॥ २०॥

चन्द्रसूर्योपरागे तु पात्रे रुक्ममये क्षिपेत् ।
दुग्धं गवां ततो मन्त्री कण्ठमात्रोदके स्थितः ॥ २१॥

स्पर्शाद्विमोक्षपर्यन्तं प्रजपेन्मन्त्रमादरात् ।
पिबेत् तत्सर्वमचिरात्तस्य सारस्वतं भवेत् ॥ २२॥

ज्योतिष्मती लताबीजं दिनेष्वेकैकवर्धितम् ।
अष्टोत्तरशतं यावद्भक्षयेदभिमन्त्रितम् ॥ २३॥

सरस्वत्यवतारोऽसौ सत्यं स्याद्भुवि मानवः ।
किं बहूक्तेन विप्रेन्द्र! मनोरस्य प्रसादतः ॥ २४॥

सर्ववेदागमादीनां व्याख्याता ज्ञानवान् भवेत् ॥। २५॥

इति नारदीयमहापुराणान्तर्गतं हयग्रीवोपासनं निरूपणं सम्पूर्णम् ।

Encoded and proofread by Chandrasekhar Karumuri

*Shri Hayagriva Upasanam Nirupanam*
pdf was typeset on August 13, 2023

Please send corrections to *sanskrit@cheerful.com*